V. I. Series—25

ṚGVEDA

with

The Padapāṭha and the available portions of the Bhāṣya-s by Skandasvāmin and Udgītha, the Vyākhyā by Veṅkaṭa-Mādhava and Mudgala's Vṛtti based on Sāyaṇa-bhāṣya

Edited,

Critically, and annotated with text-comparative data from original manuscripts and other available materials

By

VISHVA BANDHU

In collaboration with

BHĪM DEV, AMAR NĀTH, K. S. RĀMASWĀMI ŚĀSTRĪ AND PĪTĀMBAR DATTA

PART VII

(Maṇḍala X, 46—191)

HOSHIARPUR

Vishveshvaranand Vedic Research Institute

1965

वेङ्कट० ये अस्माकम् सपत्नाः ते अप[1] भवन्तु। तान् वयम् इन्द्राग्निभ्याम् अव बाधामहे। वस्वादयः[2] माम् उपरिस्पृशम् संजातानाम् उद्गूर्णम् ज्ञातारम् अधिराजम् च कुर्वन्तु इति ॥ ९॥

[1]इति अष्टमाष्टके सप्तमाध्याये षोडशो वर्गः[1] ॥

[१२९]

[1]प्रजापतिः परमेष्ठी ऋषिः। भाववृत्तं देवता। त्रिष्टुप् छन्दः[1]।

नासदासीन्नो सदासीत् तदानीं नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥ १ ॥

न। असत्। आसीत्। नो इति। सत्। आसीत्। तदानीम्। न। आसीत्। रजः। नो इति। विऽओम। परः। यत्। किम्। आ। अवरीवरिति। कुह। कस्य। शर्मन्। अम्भः। किम्। आसीत्। गहनम्। गभीरम् ॥ १ ॥

वेङ्कट० प्रजापतिः परमेष्ठी। भावानां वृत्तं प्रतिपाद्यं महाप्रलयावस्थायाम्। असच्छब्दः कारणवचनः। सच्छब्दः कार्यवचनः। अयं परिदृश्यमानः कार्यवर्गः कारणवर्गश्च न अभूत्। असच्छब्दः प्राणवचन इति। अत्र वाजसनेयकम्—'असद्वा इदम् अग्र आसीत्। तदाहुः किं तदसद् आसीदित्यृषयो वाऽव तेऽग्रेऽसदासीत् तदाहुः के त ऋषय इति प्राणा वा ऋषयः' (माश ६,१,१,१) इति। नो सदासीत् इत्ययं लोको न च अन्तरिक्षं न च परः परस्ताद् यद् भवति तदपि इति। यद्वा सच्छब्देन अन्तरिक्षम् उक्तम्।[3]'सद् इव अन्तरिक्षम्' इति ब्राह्मणम्। किम् तदानीम् भूतम् इदं सर्वम् आच्छादयामास, क्व वा तत् स्थितम्, कस्य वा गृहे। अम्भः च तदानीम् कीदृशम् आसीत् गहनम् गभीरम् इदानीं दृश्यमानम् इति ॥ १ ॥

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास ॥ २ ॥

[4]न। मृत्युः। आसीत्। अमृतम्। न। तर्हि[4]। न। रात्र्याः। अह्नः। आसीत्। प्रऽकेतः। आनीत्। अवातम्। स्वधया। तत्। एकम्। तस्मात्। ह। अन्यत्। न। परः। किम्। चन। आस ॥ २ ॥

वेङ्कट० मृत्युः न आसीत् न अपि अमृतम्। न च रात्र्याः अह्नः आसीत् प्रकेतः। अहोरात्रविभागो नासीत्। अजीवद् वातवर्जितम् स्वधया तत् एकम्। तस्मात् परम् तदानीम् न किम् च आसीत् अन्यत् इति। अत्र शाटयायनकम्—'तस्मिन्नसति सति न कस्मिंश्चन सत्यृतं ज्योतिष्मद् उदप्लवत, सत्यं ज्योतिष्मद्

---

१. नास्ति मूको. २. सत्वादयो मूको. ३-३. नास्ति मूको. ४-४. या. (७,३) निगमोऽयं द्र.

उदप्लवत, तपो ज्योतिष्मद् उपप्लवत। तद् यद् ऋतम् इति वाक् सा, यत् सत्यम् इति प्राणः सः, यत्तप इति मनस्तत्। तेषामन्नम् एव ज्योतिरासीत्' (जैब्रा ३,३६०) इति ॥ २ ॥

तम आसीत् तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम् ॥ ३ ॥

तमः । आसीत् । तमसा । गूळ्हम् । अग्रे । अप्रऽकेतम् । सलिलम् । सर्वम् । आः । इदम् ।
तुच्छ्येन । आभु । अपिऽहितम् । यत् । आसीत् । तपसः । तत् । महिना । अजायत । एकम् ॥

वेङ्कट० अथ तमः आसीत् इति प्रकृत्यभिप्रायम् आहुः। तेन तमसा गूळ्हम् इदम् सर्वम् अग्रे अप्रज्ञातम् आसीत्। ईदृशम् इति वक्तुम् न आसीद् इति। तदुक्तं मनुना (१,५)— 'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्' इति। ततः सलिलम् इदम् आसीत् सर्वम्। तुच्छिः क्षुदिना समानकर्मा। क्षोदनीयेन मृत्युना उदकेन यत् महो[1] ब्रह्म अपिहितम् आसीत्, तस्मात् ब्रह्मणः तपसः महिम्ना एकम् भूतम् अजायत। तदिदं मन इत्याहुः ॥ ३ ॥

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ ४ ॥

कामः । तत् । अग्रे । सम । अवर्तत । अधि । मनसः । रेतः । प्रथमम् । यत् । आसीत् ।
सतः । बन्धुम् । असति । निः । अविन्दन् । हृदि । प्रतिऽइष्य । कवयः । मनीषा ॥ ४ ॥

वेङ्कट० ब्रह्मणः तदानीम् अग्रे कश्चित् कामः सम् अवर्तत[2], मनसः रेतः प्रथमम् यत् आसीत् इति। सतः बन्धुम् असति निः अविन्दन् हृदि अन्विष्य कवयः इदानीन्तनाः प्रज्ञानेन इति ॥ ४ ॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन् महिमान आसन्त्स्वधा अवस्तात् प्रयतिः परस्तात् ॥ ५ ॥

तिरश्चीनः । विऽततः । रश्मिः । एषाम् । अधः । स्वित् । आसी३त् । उपरि । स्वित् ।
आसी३त् । रेतःऽधाः । आसन् । महिमानः । आसन् । स्वधा । अवस्तात् । प्रऽयतिः । परस्तात् ॥

वेङ्कट० एषाम् दिवि स्थितानां देवानाम् इतोमुखः विततः रश्मिः भवति। सोऽयं रश्मिः एषाम् अधस्तात् किं लब्धव्यम्[3] आसीत् अपि वा उपरि इति प्रश्नः। तथा जलस्य प्रदातारो भवन्ति देवाः महिमवन्तश्च। उदकम् अधस्ताद् गच्छति, यजमानानां प्रदानम्[4] उपरि। येन देवाः महिमानः भवन्ति। तदिदं सर्वं किङ्कृतम् इति प्रश्नः ॥ ५ ॥

को अद्धा वेद क इह प्र वोचत् कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥ ६ ॥

---

१. महं वि[1]. २. अवर्ततेत अ[1]. ३. °ऽधम् वि[2]; °ब्धव्यम् अ[1]. ४. प्रदानानाम् मूको.

कः । अद्धा । वेद । कः । इह । प्र । वोचत् । कुतः । आऽजाता । कुतः । इयम् । विऽसृष्टिः ।
अर्वाक् । देवाः । अस्य । विऽसर्जनेन । अथ । कः । वेद । यतः । आऽबभूव ॥ ६ ॥

वेङ्कट० कः सत्यम् इह जानाति । कः वा इह अस्माकम्[1] प्र ब्रवीति — कुतः इयम् विसृष्टिः इति, तदिदं कुतः आजाता इत्यस्य विशदवचनम् — अर्वाक् काले देवाः च आसन् अस्य ब्रह्मणः विसर्जनेन पितुः इव पुत्राः । अथ कः जानाति प्राक्कालीनम् यतः आबभूव इति ॥ ६ ॥

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ॥ ७ ॥

इयम् । विऽसृष्टिः । यतः । आऽबभूव । यदि । वा । दधे । यदि । वा । न ।
यः । अस्य । अधिऽअक्षः । परमे । विऽओमन् । सः । अङ्ग । वेद । यदि । वा । न । वेद ॥७॥

वेङ्कट० इयम् विसृष्टिः यतः आबभूव, तदसौ जानाति । तथा विसृष्टं सर्वम् यदि वा[2] स स्रष्टा धारयति यदि वा न, तच्च स एव जानाति । यः[3] अस्य सर्वजगतः अधिद्रष्टा परमे व्योम्नि स्थितः सूर्यः, सः इदम् अङ्ग जानाति यदि वा न वा इति ॥ ७ ॥

[4]इति अष्टमाष्टके सप्तमाध्याये सप्तदशो वर्गः[4] ॥

[१३०]

यज्ञः प्राजापत्य ऋषिः । भाववृत्तं देवता । त्रिष्टुप् छन्दः, प्रथमा जगती ।

यो यज्ञो विश्वतस्तन्तुभिस्तत एकशतं देवकर्मेभिरायतः ।
इमे वयन्ति पितरो य आययुः प्र वयाप वयेत्यासते तते ॥ १ ॥

यः । यज्ञः । विश्वतः । तन्तुऽभिः । ततः । एकऽशतम् । देवऽकर्मेभिः । आऽयतः ।
इमे । वयन्ति । पितरः । ये । आऽययुः । प्र । वय । अप । वय । इति । आसते । तते ॥ १ ॥

वेङ्कट० यज्ञः प्राजापत्यः । यः यज्ञः सर्वतः तन्तुभिः छन्दोभिः ततः, यावत् एकशतविधादिकं[5] दीप्तकर्मभिः पुरुषैः आयतः दीर्घीकृतः, तम् इमे पितरः वयन्ति ये आगच्छन्ति । किञ्च ते वि-तते तस्मिन् यज्ञे प्र वयत अप वयत इति चर्त्विजो ब्रुवाणाः आसते इति । प्रवाणं दीर्घतन्तुविस्तार इति ॥ १ ॥

पुमाँ एनं तनुत उत् कृणत्ति पुमान् वि तत्ने अधि नाके अस्मिन् ।
इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराण्योतवे ॥ २ ॥

पुमान् । एनम् । तनुते । उत् । कृणत्ति । पुमान् । वि । तत्ने । अधि । नाके । अस्मिन् ।
इमे । मयूखाः । उप । सेदुः । ऊँ इति । सदः । सामानि । चक्रुः । तसराणि । ओतवे ॥ २ ॥

---

१. °कम् इह मूको. २. न मूको. ३. ये मूको. ४-४. नास्ति मूको. ५. °शतविधादिकम् मूको.